इत्युत्थितम् । यः कुष्ठप्रकृतिर्वाजी तं सर्वत्रैव ताडयेत्” इति । अधिकमश्वशब्दे उक्तम् । मांसरोहिण्यां स्त्री भावप्र०

**कशकृत्स्न** पु० ऋषिभेदे तस्यापत्यम् शिवा० अण् । काशकृत्स्न-व्याकरणशास्त्रकारके ऋषिभेदे “इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः । पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः” वोपदेवः । ततः उपका० गोत्रप्रत्ययस्य बहुषु लुक् । काशकृत्स्नेन निर्वृत्तम् चतुरर्थ्याम् अरीहणादि० वुञ् । काशकृत्स्नक तन्निर्वृत्तादौ त्रि० ।

**कशस्** न० कशति नीचं कश– गतौ असुन् । जले निघ० ।

**कशार्ह** त्रि० कशामर्हति अर्ह–अण् उप० स० । कशाताडनयोग्ये दुष्टे अश्वादौ अमरः ।

**कशिक** पु० कशति हिनस्ति सर्पम् कश शासने बा० इक । नकुले तस्य पादाविव पादावस्य उपमानपूर्वकत्वेऽपि हस्त्या० पाठात् नान्त्यलोपः । कशिकपादः ।

**कशिपु** पु० कशति दुःखम् कश्यते वा कश–गतिशासनयोः मृगय्वा० नि० । १अन्ने आच्छादने च २अमरः । एकशय्या ३भक्ताच्छादनयोश्च विश्वः । पुष्पवन्ताविवैकत्वे व अयं द्विवचनान्तः इति मेदि० । ४शय्यायाम् । “कृमैः कशिपुभिः कान्तं पर्य्यङ्कव्यजनासनैः” भाग० ३,२३,१६ । “चेदस्ति भूः किं कशिपोः प्रयासैः” भा० २,२,५ । “कशिपोः शय्यायाः” श्रीधरः । ५आसनभेदे च “क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु । क्वचित् प्रासादपर्य्यङ्के कशिपौ वा यथेच्छया” भाग० ७,१३,३७। वेदे अस्य क्लीवत्वमपि “प्रसुत्यास्य दक्षिणेन वेदिम् हिरण्मयं कशिपूपस्तृणाति तस्मिन् होतोपविशति” “हिरण्मययोः कशिपुनोः पुरस्तात् प्रत्यङ्ङध्वर्युः” शत० ब्रा० १३,४,३,१ । “कशिपु आसनभेदः । “होत्रध्वर्य्यू हिरण्मययोः कशिपुनोरुपविष्टौ” कात्या० १५,६,१ । कशिपुशब्देन मसूरक उच्यते । “फलकमिति पितृभूतिः” सं० व्या० । “अध्वर्युयजमानौ कूर्चयोः” “फलकयोर्वा, होतब्रह्मोद्गातारः कशिपुषु” कात्या० २०,२,२,१८,२०,२१ । “सपादमासनं कूर्चः (कुरसीचौकी) “पादरहितं फलकं कशिपुशब्देन मृद्वासनं मसूरक उच्यते” सं० प० व्या० । तेन मृद्वासनं पादरहितं फलकं च कशिपुशब्दार्थः ।

**कशीका** स्त्री कश+बा० ईकन् । सूतवत्सायां नकुल्याम् । “आगधिता परिगधिता या कशीकेव जङ्गहे” ऋ० १,१२६,६ । “कशीका सूतवत्सा नकुली सा यथा सह चिरं क्रीडति न कदाचिदपि विमुञ्चति” भा० ।

**कशु** पु० चेदिपुत्रे राजभेदे । “यथा चित्रैद्यः कशुः शतसुष्ट्राणाम्” ऋ० ८,५,३७ ।

**कशेरक** पु० यक्षभेदे । “मणिभद्रोऽथ धनदः श्वेतभद्रश्च गुह्यकः । कशेरकोगण्डकण्डुः” इत्युपक्रम्य “एते चान्ये च बहवो यक्षाः शतसहस्रशः” इति भा० स० १०अ० कुवेरसभावर्णने उक्तम् ।

**कशेरु(रू)** स्त्री कं जलं वातं वा शृणाति शॄ–“कै श्रः एरक् चास्य” उणा० र्ज उ वा । तृणकन्दभेदे (केशुर) उज्ज्व० । दीर्घान्तः त्वष्टुश्चतुर्दश्यां२कन्यायां सा च नरकासुरेण गजरूपेण हृता तत्कथा हरिवं० १२१अ० यथा “त्वष्टुर्दुहितरं भौमः (नरकासुरः) कशेरुमगमत्तदा । गजरूपेण जग्राह रुचिराङ्गीं चतुर्दशीम् । प्रमथ्य तां वरारोहां नरको वाक्यमब्रवीत्” उप्रत्ययान्तः पुंसि च । “किं कुर्व्वता वराहेण खाद्यन्ते हि कशेरवः” । उज्ज्व० चन्द्रः । ह्रस्वान्तं क्लीवमाह अमरः । “शृङ्गाटकं विसं द्राक्षा कशेरु मधुकं सिता” सुश्रु० । स्वार्थे कन् । तत्रार्थे न० । तद्भेदगुणा भावप्र० उक्ता यथा । “कशेरु द्विविधं तत्तु महद्राजकशेरुकम् । मुस्ताकृति लघु स्यात्तच्चिचौटमिति स्मृतम् । कशेरुकद्वयम् शीतं मधुरं तुवरं गुरु । पित्तशोणितदाहघ्नं नयनामयनाशनम् । ग्राहि शुक्रानिलश्लेष्मारुचिस्तन्यकरंस्मरम् । भारतवर्षस्य नवखण्डान्तर्गते ३खण्डभेदे पु० “ऐन्द्रं कशेरुशकलं किल ताम्रपर्णमन्यद्गभस्तिमदतश्च कुमारिकाख्यम् । नागं च सौम्यमिह वारुणमन्त्यखण्डं गान्धर्वसंज्ञमिति भारतवर्षमध्ये” सि० शि० । पुराणसर्वस्वे विष्णुपुराणे च “भारतस्यास्य वर्षस्य नव भेदान्निशामय । इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो गान्धर्वस्तथ वारुणः । अयन्तु (कुमारिकाख्यः) नवमस्तेषां द्वीपः सागरसंवृतः । योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् । पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः । ब्राह्मणाः क्षत्रियावैश्या मध्ये शूद्राश्च भागशः । इज्यायुद्धवणिज्याद्यैर्वर्त्तयन्तो व्यवस्थिताः । वेदस्मृतिमुखाश्चान्याः पारियात्रोद्भवा मुने ! । नर्मदासुरसाद्याश्च नद्यो विन्ध्यविनिर्गताः । तापीपयोष्णीनिर्व्विन्ध्याकावेरीप्रमुखा नदी । गोदावरीभीमरथीकृष्णवेण्वादिकास्तथा । सह्यपादोद्भवान्द्यः स्मृताः पापभयापहाः । कृतमालाताम्रपर्णीप्रमुखामलयोद्भवाः । त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः । ऋषिकुल्याकुमाराद्याः शुक्तिमत्पादसम्भवाः । शतद्रु-